१-१ ग द्विरुक्तिः २ ग भार्ग्य° ३ ग छ भानवं ङ मानभावतम्, भावतम् ४ क द्यौषं घ प्रौवं छ ग्रौवं

ककारं च शिरो-बीजं मूर्ध[1]-बीजं च वारुणम्[2] ।
वेधो-बीजं विधिर् ब्रह्मा स्वयंभू[3]-बीजम् एव च ॥२३॥

१ ग घ च मूर्ध्वं° छ मूर्धा° २ क दारुणं ग चारुणं ३ क ग °भूर्°

ककारस्य मया ख्यातम् [1]अनृतम् अपरं[1] वदेत् ।
ग्रन्थे छिन्नारहस्ये ऽस्मिन् पर्वतेश्वर-नन्दिनि ॥२४॥ ॥क॥

१-१ घ (व्यत्यासेन) अपरमनृतं

नमो-बीजं पुष्करं च द्यौ[1]-बीजं चक्रवालुकम्[2] ।
वैष्टर[3]श्रव[4]-बीजं च[3] प्रोक्तं त्रिपुरया[5] स्वयम्[6] ।
[7]आगमामृतमञ्जर्यां दुर्लभायां ममापि[8] च[7] ॥२५॥ ॥ख॥

१ क द्योर्° ङ चौर् च छ घो° २ ? क चक्रवाललं च छ चक्रवालकं ३-३ क खण्डितम्
४ ख चैष्टरश्रव° घ ङ वैष्टरं श्रव° ५ घ त्रिपुरा ६ क घ श्रुतं ७-७ क नास्ति
८ ग ङ मायापि

शिव-बीजं च शंभुश् च शर्वः शंकर एव च ।
गकारस्यानृतम् अन्यद् भाषितं च मया प्रिये[1] ।
कुलचूडामणौ ग्रन्थे दुर्लभे त्रि-दिवे ऽपि[2] च[2] ॥२६॥ ॥ग॥

१ घ शिवे च छ नघे २-२ ग घ ङ प्रिये

जिन-बीजं षडभिज्ञं मारजिद्-बीजम् एव च ।
मायात्मजो[1] ऽर्कबन्धुश् च गौतमम् अनृतं परम् ।
घकारस्य मया ख्यातं ग्रन्थे वै रुद्रयामले ॥२७॥ ॥घ॥

१ क च मायात्मको छ मायान्मजो

षडाननः शर[1]-जन्मा स्कन्दः कुमार-बीजकम् ।
शाम्भवः शालिगी[2]-बीजम् अनृतम् अपरं स्मृतम् ।
कुब्जिकासर्वस्वे [3]ख्यातं मया त्रैलोक्य-पूजिते[3] ॥२८॥ ॥ङ॥

१ च शरज्° २ क ग शालगी° ख शामो° ३-३ च छ ग्रंथे कथितं(छ ख्यातं) भैरवतंत्रके

नाट्य-बीजं च नटनं ताण्डवं नृत्त[1]-बीजकम् ।
चकारस्य मया ख्यातं ग्रन्थे[2] भैरव-तन्त्रके[3] ॥२९॥ ॥च॥

१ घ च छ नृत्य° २ क तंत्रे ३ क ख भैरवसंज्ञके च छ त्रैलोक्यपूजिते

शनि-बीजम् अर्कजं[1] च पङ्गु-बीजं तथैव च ।
कालं[2] च सौर-बीजं च सूतिः[3] सुन्दर-बीजकम् ।

छँ-बीजं च मया प्रोक्तं[5] ग्रन्थे वामकेश्वरे शिवे ॥३०॥ ॥छँ[6]॥
शँनि-बीजौ द्वौ छँ जें[7] ॥

१ ग अक्षजं २ छ कीलं ३ ख घ छ सूति ग ङ मूर्ति ४ क ग ङ च छ छं°
५ ख ख्यातं ६ क ङ च छ छं ७-७ क नास्ति । घ (व्यत्यासेन) छ ज द्वौ शनिबीजौ
८ ङ छं ९ ख च छ ए ङ जें

स्तन-बीजं कुचं चैवम् उरोजो हृज्जम् एव च ।
जकारस्य मया ख्यातम् अन्यद् अनृतम् आवदेत् ।
[1]आगमालंकरणे[2] ऽपि[3] ग्रन्थे भैरव-निर्मिते[4 1] ॥३१॥ ॥ज॥

१-१ घ अपरं च मया ख्यातं मेकारस्या सुरेश्वरि कुलचूडामणौ ग्रंथे रचिते मांत्रिकोत्तमैः
२ क °कारेणे ग ङ °करजे घ °कारणे ३ च छ नास्ति । ग ङ च
४ च छ भैरवेण विनिर्मिते

इच्छा-बीजं स्पृहा काङ्क्षा लिप्सा[1]-बीजं चतुष्टयम् ।
झकारस्य मया ख्यातम् असत्यम् अपरं स्मृतम् ।
त्रैलोक्य-प्रथिते[2] ग्रन्थे दे[3]वि वै वामकेश्वरे[3] ॥३२॥ ॥झ॥

१ क ख ग घ लिशा° २ च छ °पूजिते ३-३ घ नास्ति

[1]यम-बीजं काल-बीजं कृतान्तं[2] समवर्तिनम्[3] ।
कीनाशं[4] मृत्यु-बीजं च ञकारस्य मया स्मृतम् ।
त्रिपुरासर्वस्वे[5] ग्रन्थे[1] त्रि-जगद्-दुर्लभे प्रिये ॥३३॥ ॥ञ॥
[6]काल-बीजौ द्वौ[7] ञं छं[8] चं[6] ॥

१-१ घ नास्ति २ क ग ङ कृतांत छ कूतांत ३ ख समवर्तितं ग समवर्ततं ४ ख ग केनाशं अन्यत्र कीशाशं ५ च त्रिपुरातिलके ६-६ च छ नास्ति ७ घ नास्ति ८ क ख नास्ति

गर्जितं स्वन-बीजं च स्तनितं रसितं तथा ।
टकारस्य मया ख्यातं स्व-तन्त्रे देव-वन्दिते ॥३४॥ ॥ट॥
पद्मं पङ्कज-पयोजौ नीरजम् अम्बुजं तथा ।
पञ्च ठकार-बीजानि कृत्रिमाण्य् अपराणि च ।[1]
मया ख्यातानि देवे[2]शि तै[3]न्त्रे वै[3] वामकेश्वरे ॥३५॥ ॥ठँ[4]॥

१ अधिपाठः क ठ २ घ सर्वश्वे ३-३ क तंत्रैवै ख तंत्रैवं ग ङ तत्रैव घ तंत्रैवा
च तत्रैवै छ तंत्रे वै ४ क नास्ति

सिंहिका सरसी-बीजं रेणुका-बीजम् एव च ।
अञ्जनी-बीजकं[1] ख्यातम् अनृतम् अपरं स्मृतम् ।
डकारस्य मया देवि ग्रन्थे वै रुद्रयामले ॥३६॥ ॥ड॥

१ घ °बीजका च °बीजम् आ-

वायु-बीजम् अनिलं[1] च समीरणं[2] मरुत् तथा ।
[3]समीरं चाशुगं[3] ज्ञेयं वातं श्वसन-बीजकम् ।
ढकारस्य मया ख्यातम् [4]अन्यद् अनृतम् आवदेत्[4] ॥३७॥ ॥ढ॥
वायु-बीजौ ढ्वौ[5] ढं[6] यं भैरव-तन्त्रे[7] ॥
[8]आशुग-बीजौ ढ्वौ[9] णं ढं[8] ॥

१-१ च (व्यस्यासेन) अनिलं वायुबीजं   २ क ग घ ङ च समीरण-   ३-३ क ख समोरश्चासुगं   ४-४ च छ अनृतमपरं स्मृतं   ५ क नास्ति   ६ क ख ग च ठं घ वृं छ ट   ७ च छ नास्ति   ८-८ क ३८ श्लोकात् परम्   ९ क ख ग च छ नास्ति

वाण-बीजं मार्गणं च पत्रिणम्[1] आशुगं तथा ।
णकारस्यानृतम् अन्यद् ग्रन्थे भैरव-तन्त्रके ॥३८॥ ॥ण॥

१ क यंत्रिणम् च छ पतत्रिणम्

रात्रि-बीजं तमो-बीजं [1]तामसी-बीजम् एव च[1] ।
क्षपा च क्षणदा-बीजम्[2] अन्यद् अनृतम् आवदेत् ।
कुब्जिकासर्वस्वे[3] ग्रन्थे तं-बीजं च मया स्मृतम् ॥३९॥ ॥त॥

१-१ क ख घ ङ तामसी(क °शी) च निशा तमः(क ततः ङ मतः)   २ ग °बीयाम्   ङ °बीयाद् च °बीचम्   ३ घ तथा च कुब्जिका-

विल-बीजं च विवरं सुषिरं नाग-लोककम् ।
थकारस्य मया ख्यातं तन्त्रे वै कुलिकार्णवे ॥४०॥ ॥थ॥
चक्रि-बीजं व्यालं[1]-बीजं सर्पः काकोदरोरगौ ।
भोगि-बीजं भुजङ्गं च भुजङ्गमम्[2] इति स्मृतम् ॥४१॥

१ ग घ ङ व्यालि°   २ क भुजगमाम् च भुजगाताम्

दकारस्य मया ख्यातम् अनृतम् अपरं स्मृतम् ।
स्व-तन्त्रे देव-देवेशि दक्षिणामूर्तिना कृते ॥४२॥ ॥द॥
पुष्प-बीजं प्रसूनं च प्रसूतिः[1] सुप्रजा तथा ।
धकारस्यानृतम् अन्यत् [2]त्रिपुरातिलकं स्मृतम्[2] ॥४३॥ ॥ध॥

१ ध-वर्जम् अन्यत्र प्रसूति   २-२ च छ मया ख्यातं सुरेश्वरि

[1]क्षार-बीजं च[1] लवणं सैन्धवं सूकरं वृकम्[2] ।
वाराहम् अनृतम् अन्यन् [3]मया ख्यातं सुरेश्वरि[3] ।
[4]त्रैलोक्य-प्रथिते ग्रन्थे त्रिपुरायाः शिरोमणौ[4] ॥४४॥ ॥न॥[5]

१-१ क ग घ क्षारबीजार्ति(ग °ति) छ क्षीरबीजं च   २ ख कृकं ङ च छ तथा
३-३ च छ त्रिपुरातिलके स्मृतं   ४-४ च छ नास्ति   ५ क घ च ४६ श्लोकम् अत्र पठन्ति

मत्स्यं च मीन-बीजं च शफरी-बीजम् एव च ।
झष-बीजं मया ख्यातं ग्रन्थे छिन्नाशिरोमणौ ॥४५॥

१ प्राक्पाठः ग दक्षिणाकृतब्रह्मस्थं स्वछंदं देवताकृतं ङ दक्षिणाकृब्रन्मस्थं सुछंदं देवताकृतं
२-२ छ नास्ति । च तंत्रे त्रिपुरभैरववे

कूर्म-मीन-पद-व्याप्तौ बीजार्णं सदृशं शिवे ।
फकारस्य पकारस्य भेदो नास्ति परस्परम् ।
भाषणोद्धार-विषये लिखने प्रकृतिः पृथक् ॥४६॥ ॥पं॥

१-१ ङ छ नास्ति । क घ च ४४ श्लोकात् परम् २ ? क वीजार्णं घ वीजार्णेण
३ घ छ नास्ति

कूर्म-बीजं च कमठं कर्कटो ऽपि कुलीरकम् ।
कच्छपम् अनृतम् अन्यन् मया ख्यातं च भामिनि ।
शारदापटले ग्रन्थे त्रैलोक्य-प्रथिते शिवे ॥४७॥ ॥फ॥

१-१ च छ नास्ति २ ग घ ङ कमलं ३ क घ ककरो ४-४ च नास्ति

ऊर्मिर् वीचिस् तथा चैवं तरङ्गस् त्रितयं स्मृतम् ।
असत्यम् अपरं ज्ञेयं मया ख्यातं सुरेश्वरि ।
कालिकासर्वस्वे ग्रन्थे ब्रह्मणैव प्रकाशिते ॥४८॥ ॥ब॥

१ क ङ च छ ऊर्मि- घ ऊर्मी- २ ख छ चैव ३ ख-वर्जम् अन्यत्र तरंगास्
४ ग घ ङ ज्ञानं ५-५ घ नास्ति

भद्रिका भास्वती भीमा भकारस्यानृतं परम् ।
तन्त्रे वै मुण्डमालायां मया ख्यातं सुरेश्वरि ॥४९॥ ॥भ॥

१ क ख हि पार्वति(क °ती)

दुलि-बीजं शिली-बीजं मण्डूकं दुर्दुरं तथा ।
भेकी-बीजं मया ख्यातम् असत्यम् अपरं स्मृतम् ।
आगमामृतमञ्जर्यां पर्वतेश्वर-नन्दिनि ॥५०॥ ॥म॥

१ ? ख डलि° ग दूलि° घ डुलि° च दलि° २ ख शिलि° ग शिरो° घ शिला°
३ ख छ मंडकं ४ क छ दर्दुरं च दर्दुरी ५ क भेकि° ख वीकी° ग भीके
६ ख पर्वतीश्वर° ग पार्वतेश्वर°

वायु-बीजं तथा वाग्मि-वाचालं वैश्य-बीजकम् ।
वीरा शार्णं तथा वापी मया ख्यातं स्व-तन्त्रके ॥५१॥ ॥य॥

१ क वशा ग वणा घ चशा २-२ ? ख च छ वीरवीजं

अग्नी रेफश् च वह्निश् च हुतभुग् हव्यवाहनः ।
रकारस्य मया ख्यातं श्यामा-तन्त्रे सुरेश्वरि ॥५२॥ ॥र॥

तमो-बीजं तथा ध्वान्तं मोहं तिमिरम् एव च ।
लकारस्य मया ख्यातं स्[1]व-तन्त्रे मुनि-निर्मिते[1] ॥५३॥ ॥लं[2]॥

१-१ घ ग्रंथे भैरवतंत्रके २ ख ग ङ नास्ति । घ लं

[1]अभ्र-बीजं[2] च जीमूतम् अम्बुभृद् अवलं घनम् ।
वकारस्य मया ख्यातं [3]तन्त्रे वै वामकेश्वरे[3] [1] ।
[4]भू-बीजं धरणी-बीजं [5]वकारं भाषितं मया[4] ॥५४॥ ॥वं[6]॥

१-१ ङ नास्ति २ क घ अभ्रं मेघं ३-३ घ स्वतंत्रे मुनिनिर्मिते । अधिपाठः क ङ च छ ॥व॥ ४-४ घ नास्ति । ग ५३ श्लोकात् परम् ५ ग ङ लकारं ६ घ नास्ति । ङ ल व

[1]कल्याणं चैव शर्मापि शं शुभं च[2] चतुष्टयम् ।
शकारस्य मया ख्यातं [1][3]ग्रन्थे भैरव-तन्त्रके[3] ॥५५॥ ॥श॥

१-१ घ नास्ति २ ख ङ नास्ति । क ग व ३-३ घ नास्ति । ख ६० श्लोकात् परम् तंत्रे भैरवसंज्ञके

[1]शम्पा[2]-बीजं तडिद्-बीजं विद्युच् छतह्रदा रतिः[3] ।
ह्लादिनी-बीजकं चैवम् असत्यम् अपरं स्मृतम्[1] ।
मया ख्यातं सुरेशानि ग्रन्थे वै रुद्रयामले ॥५६॥ ॥पं[4]॥

१-१ ख ६० श्लोकात् परम् २ क चंपा° ख शया° घ शम्बा° ३ ङ ततः च छ तथा ४ ङ च षं

शक्तिः[1] शर्मापि विज्ञेये शरच्-छक्के [2]तथैव च ।
सकारस्य मया ख्यातं ग्रन्थे छिन्नाशिरोमणौ ॥५७॥ ॥सं[2]॥

१ ख ग घ ङ शक्ति- २-२ ख ६० श्लोकात् परम्

[1]छवि-बीजं कान्ति-बीजं शोभापि[2] सुषमा तथा ।
आकाशं च हकारस्यानृतम् अन्यन् मया स्मृतम्[3] ।
[4]सिद्धसारस्वते[4] ग्रन्थे नित्यं मान्त्रिक[5]-पूजिते ॥५८॥ ॥ह[1]॥

१-१ ख ६० श्लोकात् परम् २ क ख ग ङ शोभा भा घ सोभा भा ३ क श्रितं ग घ ङ श्रुतं ४ घ छ सिद्धिसारस्वते ङ सिंधुसारस्वते ५ क मातृक° ख ग मान्त्रिक°

देव-बीजं निर्जरं च त्रिदिशं[1] त्रिदिवेशकम्[2] ।
सुर-बीजं च गीर्वाणं लेखम् अमर-बीजकम् ।
क्षकारस्य मया प्रोक्तं कुलचूडामणौ प्रिये ॥५९॥ ॥क्षं[3]॥

१ क विदिशं ख ग त्रिदिवं(ख द्विरुक्तिः) ङ च छ त्रिदशं २ च त्रिदवेशकं ३ च छ ६० श्लोकात् परम्

वर्णानां देव-देवेशि कोशं[1] प्रोक्तं[1] मया शिवे ।
नाना-मन्त्र-युतं देवि सर्वागम-विनिश्चितम् ॥६०॥

१-१ च छ कोशः प्रोक्तो

इति[1] श्रीदक्षिणामूर्ति[2]-विरचित उद्धारकोशे
सर्वागम-मन्त्र-सारे[3] सर्व-वर्ण-कोशाख्यानं नाम
पञ्चमः कल्पः[1] ॥

१-१ ख नास्ति । घ इति श्रीउद्धारकोशे मात्रिकाकेशो नामाध्यायः २ ङ श्रीदक्षिणामूर्तिमुनि°
३ ङ छ °सागरे

द्वैयक्षराणां[2] पृथङ् नाम क्रीं[3] प्रीं श्रीं ह्सौः[4] तथा ।
पृथङ् नाम सुरेशानि सकलागम-निश्चितम् ॥१॥

१ ☞ सर्वे एवायं कल्पः ख नास्ति । प्राक्पाठः क घ च ओं २ क ग ङ अक्षराणां
३ ग ङ मं क्रीं ४ क ह्सौ घ ह्रौ छ ह्सौस्

अद्य वक्ष्यामि ते देवि तिस्रो भुवन-देवताः ।
दक्षिणामूर्तिना पूर्वम् ऋषीणां भाषिताः स्वयम्[1] ॥२॥

१-१ च नास्ति

भवानी देव-देवेशि द्वितीया बगला[1]मुखी ।
इन्द्राक्ष्य् अपि[2] तृतीया च तिस्रो भुवन-देवताः ॥३॥

१ क ग घ भगला° २ ग घ सा

आसाम् अहं ते मन्त्राणि वक्ष्यामि[1] श्रृणु पार्वति ।
यस्य[2] कस्यै[2] न वक्तव्यं न वक्तव्यं वरानने ॥४॥

१-१ क (व्यत्यासेन) वक्ष्यामि मंत्राणि २-२ च यस्मै कस्मै

८०

तत्रादौ[1] भवानी-मन्त्रोद्धारः

उक्तं[2] च[2] मुण्डमाला-तन्त्रे[3]—

प्रणवं चैव द्वे पद्मे त्र्यक्ष-युग्मं परौ[4] पुनः[5] ।
हरिणाक्षी-द्वयं कूर्चं हरं ठ-द्वय-संयुतम् ॥५॥

१ क छ आदौ च अथ २-२ ग घ ङ च छ नास्ति ३ च मुंडमालायां ४ क ग घ ङ पुरा ५ ङ मुतः च मनुः

प्रकाशम्

ओं श्रीं श्रीं ओं ओं ह्रीं[1] श्रीं[1] श्रीं हूं फट् स्वाहा ॥[2]

१-१ क नास्ति । ग ङ ह्रीं ह्रीं श्रीं २ अधिपाठः ग घ ङ मूलं

८१

अथ बगलामुख्याः

उक्तं[3] चाँगमलहर्याम्[4]—

तारवं[5] चैव मृद्-बीजं द्व्यक्षरं[6] समुदाहृतम् ।
मन्त्रं च द्वि-शिरो ज्ञेयं ततः पल्लवम् उद्धरेत् ॥६॥

१ क नास्ति २ क वगुलामुखीमंत्रोद्धारः ग भगलामुख्या ३ क-वर्जम् अन्यत्र नास्ति
४ ग घ ङ च छ आ° ५ च प्रणवं ६ ङ च छ द्व्यक्षरो

भगवति बगलां[1]- च -मुखि देवि ततः पुनः ।
तथापि सर्व-दुष्टानां वाचं मुखं पदं तथा ॥७॥

१ क ग भगला

स्तम्भय-द्विस् तथा जिह्वां कीलय-द्विर् बुद्धिं तथा[1] ।
विनाशय-द्वि-वारं च मृत्तिका-बीजकं तथा ।
त्र्यक्षम् अन्ते पयो ज्ञेयं द्विपञ्चाशाक्षरो मनुः[2] ॥८॥

१ अधिपाठः ग स्तंभयद्विस्तथा जिह्वां २ क हनुः

(४४) अथ मृद्-बीजोद्धारः[2]

उक्तं[3] च[4] भैरव-तन्त्रे[5]—

मृद्-बीजं मृत्तिका-बीजं मृत्स्ना-बीजं प्रशस्तिका ।
मृत्स्नानृतं परं ज्ञेयं पर्वतेश्वर-नन्दिनि ॥९॥

१ ग ङ तत्र घ तत च छ तथा २ क °बीजोद्धाराणि घ मृद्धिवीजः ३ घ च नास्ति
४ ग घ ङ च छ नास्ति ५ घ नास्ति । क ग भैरवे तंत्रे

प्रकाशम्

ओं ह्लीं[1] भगवति बगलामुखि[2] देवि
सर्व-दुष्टानां वाचं मुखं पदं स्तम्भय स्तम्भय
जिह्वां कीलय कीलय बुद्धिं विनाशय विनाशय
ह्लीं[3] ओं स्वाहा ॥[4]

१ क ह्रीं ग ङ छ क्लीं २ क भगलमुखि घ वगलमुखी ३ क ह्रीं ग ङ क्लीं छ स्लीं
४ अधिपाठः ग घ ङ छ मूलं

८२

अथेन्द्राक्ष्याः

उक्तं[3] च[2] रुद्रयामले—

त्र्यक्षं कुन्ती-द्वयं देवि कूर्च-युग्मं तथैव च ।

प्रस्थ-बीजं परां पद्मां[3] चर्माणं च ततो ऽभिधम्[4] ॥१०॥

१ क अथेंद्राक्षीमंत्रोद्धारः ग अथेंद्राख्या च अथेंद्राक्षा २-२ क-वर्जम् अन्यत्र नास्ति
३ ग ङ पद्मं ४ घ भिधां च छ भियां

इन्द्राक्षि वज्र-हस्ते ऽन्ते लक्ष्मीं लज्जां च पुष्करम् ।

तीर-युग्मं द्वे[1] रसने[1] त्रासश्च चन्द्रो हरं वनम् ।

इन्द्राक्ष्या देव-देव्याश्च च ह्य् अष्टाविंशाक्षरो मनुः ॥११॥

१-१ ग घ ङ (व्यत्यासेन) रसने द्वे

(४५) अथ[1] प्रस्थ-बीजोद्धारः[2]

उक्तं[3] च[3] शारदापटले—

प्रस्थ-बीजं सानु-बीजं शिखरं पुष्करं तथा ।

म्लौं[4]-बीजोद्धारम् एतद् धि चान्यद् अनृतम् आवदेत् ॥१२॥

१ च नास्ति । ग ङ तत्र घ ततो २ क °बीजोद्धाराणि ३-३ क-वर्जम्
अन्यत्र नास्ति ४ क ग घ ङ म्लौ°

प्रकाशम्

ओं क्रीं क्रीं हूं हूं म्लौं[1] ह्रीं श्रीं

ऐं इन्द्राक्षि वज्र-हस्ते

श्रीं ह्रीं म्लौं[2] हूं हूं क्रीं[3] क्रीं[3] ओं

ऐं फट्[4] स्वाहा[4] ॥

१ घ म्लौ ङ म्लों २ क घ म्लौ ङ म्लां ३-३ ग ङ क्लीं क्लीं ४-४ ङ (व्यत्यासेन)
स्वाहा फट् । अधिपाठः ग घ ङ मूलं

तिस्र एता मया ख्याता देवि भुवन-देवताः ।

दक्षिणामूर्तिना भक्त्या संसारे ऽस्मिन् प्रकाशिताः ॥१३॥

८३

[अथ खेचर्याः]

अथाहं देव-देवेशि खेचर्या वच्मि वै मनुम् ।

याम् आश्रित्य लभेद् योगी खेचरीं सिद्धि-दां कलाम् ॥१४॥

उक्तं[1] च[1] विश्वयामले—

गीर्वाणाद् दशमं वर्णं चोद्धरेत् प्रतिलोमतः ।

तमो-बीजं ततो देद्यान्[2] माया-बीजं ततः परम्[2] ॥१५॥

१-१ क-वर्जम् अन्यत्र नास्ति २-२ घ नास्ति (दृष्टि-प्लुतिः)

ततो दद्याच् छरद्-बीजं कूटो[2] ऽयं परिकीर्तितः ।

मन्त्रं तुर्य-शिरो ज्ञेयं योगी दद्यात् ततो ऽभिधाम् ।

खेचर्यैं च ततो[1] दद्याद् अन्ते[3] सौष्मकम्[4] एव च[3] ॥१६॥[5]

१-१ घ नास्ति (दृष्टि-प्लुतिः) २ च कूपो ३-३ क मायाबीजं ततः स्मृतं ४ ? क ह्यष्मकं ग घ ह्योश्मकम् च ह्यौसमकम् छ ह्योमकम् ५ अधिपाठः क ततो दद्याकरद्वीजं कूपेयं परिकीर्तितः

प्रकाशम्

मं ल ह्रीं सौः[1] खेचर्यैं नमः[2] ॥

१-१ क म्ह्रीं ग घ ङ मं (घ म)ल ह्र र(ङ रं) सौ (घ सौः) । ङ पाठान्तरत्वेन मं ल म्लीं म्लीं च छ म्लीं सौः (च सौ) २ अधिपाठः ग घ ङ च छ नमः

अथ वक्ष्यामि देवेशि[1] ध्यानान् आगम-निश्चितान् ।

एतासां देवतानां च ग्रहाणां देवै[3]-वन्दिते[2] ॥१७॥

१ ग घ ते देव ङ त देवि २-२ घ नास्ति ३ घ छ चापि च वीर°

तथा सप्त-कुमाराणां ध्यानं[2] तन्त्रे[3] विनिश्चितम्[4] ।

तथा भेद-विहीनानां[1] श्रृणु पार्वति तत्त्वतः ॥१८॥

१-१ ग नास्ति २ क ध्यानांस् ३ ङ तंत्र- ४ क विनिश्चितान्

इति श्रीदक्षिणामूर्ति-विरचिते[1] उद्धारकोशे[2]

त्रि-देवी-खेचरीणां[3] कोशाख्यानं[4] नाम

षष्ठः कल्पः[5] ॥

१ घ ङ नास्ति २ ग नास्ति ३ क खेचरसर्वागमतंत्रसारे घ त्रिपुरदेवतादेवीखेचरी- च मृद्देवीखेचराणां छ तिसृदेवीखेचरीणां ४ क कोशाख्यं घ उद्धारकोशो ५ क नास्ति । घ ध्यायः ङ पटलः । अधिपाठः क श्रीगणपतिसूर्याभ्यां नमः ॥ घ श्रीगुरवे नमः ॥

अथादौ दश-विद्यानां ध्यानं वक्ष्यामि त्वं[1] शृणु ।
वामकेश्वर-तन्त्रोक्तं त्रिपुरायाः सुरेश्वरि ॥१॥

१ क ख ग त तं च छ त

दिव्याम्बराङ्कित-तनुं मिहिराग्नि-चन्द्र-नेत्राम्[1] ।
सुधांशु-मुकुटां[2] हिम-संनिभाभाम्[3] ॥२॥

१ ग च मिहराग्नि° घ मिहरां कराडनेत्रां २ च °मुकुडकां छ °मुक्तटां
३ घ °सन्निभं च च °सन्निभां

सिंहासनां परशु-खड्ग-धरां भुजाभ्याम् ।
ब्रह्मेन्द्र-विष्णु-नमितां त्रिपुरां भजे ऽहम् ॥३॥
अथ वक्ष्ये श्रियो ध्यानं भाषितं रुद्रयामले ।
मुनि-साधक-गीर्वाण-विप्र-वर्गैः सुपूजिते ॥४॥
[1]लक्ष्मीं पद्मासन-गत-कटिं[2] सूर्य-शीतांशु-नेत्राम् ।
उद्यद्-भास्वत्-कनक[3]-रुचिं पद्म-शङ्खासि-पाणिम् ॥५॥

१ प्राक्पाठः घ ओं २ क °कटीं ३ क ख °करच° घ °करक° च छ °करचय°

नाना-मुक्ता-मणि-सुशकलो[1]भूषिताङ्गीं[2] द्वि-बाहुम् ।
नित्यं[3] लोक-त्रितय-फल-दां नौम्य् अहं भक्ति-पूर्वम् ॥६॥

१-१ ग नानामुक्तिस्वकलशा° घ °सकला° ङ °सुशकलशा° च °सुकशला° छ °सुशविलां
२ क च छ °भूषितांगां ख भूषितांगि ३ च छ नित्य-

अथ वक्ष्यामि वाग्देव्या ध्यानं विद्या-प्रदं शिवे ।
तन्त्रमुक्तावली ग्रन्थे दुर्लभे त्रि-दिवे[1] ऽपि च[1] ॥७॥

१-१ च त्रिदिवैरपि

[1]वाणीं पूर्ण-निशाकरोज्ज्वल-मुखीं कर्पूर-कुन्द-प्रभाम् ।
चन्द्रार्धाङ्कित-मस्तकां निज-करैः [2]संबिभ्रतीम् आदरात्[2] ॥८॥

१ प्राक्पाठः ख घ ओं २-२ ख घ संविभ्रतीं सादरात्

वीणाम् अक्ष-गुणं सुधाढ्य-कलशं [1]विद्यां च तुङ्ग-स्तनीम्[1] ।
दिव्यैर् आभरणैर् विभूषित-तनुं सिंहाधिरूढां[2] भजे[3] ॥९॥

१-१ क विद्याच्च तुरंगस्तनीं ख विद्या च तुंगस्तनी २ घ ङ हंसाधिरूठां (ङ °ढा)
३ क ग घ भजेत्

अथ वक्ष्यामि ताराया ध्यानं भैरव-तन्त्रके ।
देव्या भेद-विहीनाया मुनि-साधक-पूजिते ॥१०॥

देवीं पन्नगे[1]-भूषितां[2] हिम-रुचिं शीतांशु-शङ्ख-प्रभाम् ।
मुक्ता-रत्न-परीत-कण्ठ-वलयां रक्ताम्बरां बिभ्रतीम् ॥११॥

१ ख पन्ना॰ ग पन्नगां छ पन्नाग॰ २ ख भूषितं च भूषणं छ भूषणां

शूलाब्जासि-गदा-धरां सुर-गणैर् वैकुण्ठ-मुख्यैः स्तुताम् ।
नित्यं लोक-त्रयैक-रक्षण-परां तारां त्रि-नेत्रां भजे[1] ॥१२॥

१ घ भजेत्

अथाहं भुवनेश्वर्या ध्यानं वक्ष्यामि तच्[1] छृणु ।
साधकेष्ट-प्रदे ग्रन्थे निःस्मृतं[2] रुद्रयामले ॥१३॥

१ क तं २ क ग निःसृतं ख निंसृते घ निस्मृते

उद्यद्[1]-भानु-सहस्र-संनिभ-मुखीं पीन-स्तनीं पद्म-गाम्[2] ।
दोर्भिर् अङ्कुश-पाश-पुस्तक-जयान्[3] संबिभ्रतीं[4] सादरात्[5] ॥१४॥

१ प्राक्पाठः ख घ ओं २ च पद्मनीं ३ ! क ख ङ च ॰जयात् घ जयां
४ क ग संविभ्रति ख ॰तिं च ॰ती ५ क ङ सादरं ग मादरं

ब्रह्मा[1]-विष्णु[2]-महेश्वरेन्द्र-मुनिभिर् नित्यं स्तुतां वन्दनैः ।
स्तोत्राद्यैर् भुवनेश्वरीं त्रि-नयनां हृत्-पङ्कजे ऽहं भजे ॥१५॥

१ क ख घ छ ब्रह्मा॰ ङ ब्रह्मो॰ २ ङ ॰पेंद्र॰

अथ वक्ष्यामि मातङ्ग्या ध्यानं पर्वत-नन्दिनि ।
कुब्जिकासर्वस्वे ग्रन्थे[1] ममाप्य् अत्यन्त-दुर्लभे ॥१६॥

१ घ ङ तंत्रे

चन्द्रार्धाङ्कित[2]-शेखरां त्रि-नयनां कोटीन्दु-सूर्य-प्रभाम् ।
नाना-रत्न-सहस्र-बद्ध-रसनां[3] प्रेतासने संस्थिताम् ॥१७॥

१ प्राक्पाठः ख ओं २ क ग ङ ॰र्धांकृत॰ ३ ग नानाबद्धसहस्रचंद्ररशनां ङ च ॰रशनां

शङ्खं तोमर-पट्टिसाब्ज[1]-युगलां[2] दोर्भिर् वहन्तीं मुदा[3] ।
ध्याये ऽहं हृदये सदा भगवतीं मातङ्गिनीं हारिणीम्[4] ॥१८॥

१ क ॰पट्टिसाच॰ ख ॰पटीसौब्जि॰ ग घ ॰पट्टसब्जि॰ २ क ॰युगमं ग ॰युगलान्
३ ग सदा घ मुदां ४ क ग घ हारणीं

अथ वक्ष्ये महेशानि शारिका-ध्यानम् उत्तमम् ।

आगमामृतमञ्जर्यां निःस्मृतं[1] दुर्लभं जनैः ॥१९॥

१ ङ निस्मृतं अन्यत्र निःसृतं

श्री[1]-शङ्ख[2]-चक्र-मुसलाम्बुजं[3]-युग्म-हस्ताम्।
नागेन्द्र-हार-वलयाङ्कित-कण्ठ-मालाम्[4] ॥२०॥

१ प्राक्पाठः ख घ ओं २ ख श्रीं ३ क च °मुसुलांवुज° ख °मुशुलांवुज° ग °मुसुलाब्ज° ङ °मुसलाब्ज° ४ च °वालां

सिन्दूर-कुङ्कुम-सहस्र-मरीचि-दीप्तिम्[1]।
श्रीशारिकां त्रि-नयनां हृदये स्मरामि ॥२१॥

१ ख °प्तां घ °प्री च °प्ति

अथ वक्ष्यामि देवेशि राज्ञी-ध्यानम् अनुत्तमम्[1]।
वामकेश्वर-तन्त्रोक्तं पर्वतेश्वर-नन्दिनि ॥२२॥

१ ङ उत्तमम्

शीतांशु[1]-बालार्क-कृशानु[2]-नेत्राम्[3]।
चतुर्-भुजाम् एण-त्वग्-आसन-स्थाम् ॥२३॥

१ प्राक्पाठः ख घ ओं २ क शीतांशुभ्रशुभालार्क कुशां° ख शीतांशुभ्रशुवा° ग °कृषाण° ङ °कृशानुं ३ क त्रिनेत्रां ख नेत्रो

शङ्खाब्ज-शूलासि-धरां[1] महेशीम्[2]।
राज्ञीं[3] भजे ऽहं तुहिनाद्रि-रूपाम् ॥२४॥

१ ख घ °शूलाशिधरां छ °शूलाधिधरां २ ख महेशिं ङ महीशीं ३ क ग च राज्ञीं घ राज्ञी

अथ वक्ष्यामि भेडायां[1] ध्यानम् इच्छा[2]-फल-प्रदम्।
निःस्मृतम्[3] आगमोद्द्योते[4] मया विरचिते स्वयम् ॥२५॥

१ क ङ भीडाया २ क घ इक्ष्या° ३ क निःसृताम् ख घ निसृत्य ग निस्मृताम् ङ निःसृतस्या- ४ क आगमंद्योते ख अमगमेकल्पै घ अमागमंकल्पे ङ गमोद्योगे

उद्यच्[1]-छीतांशु-रश्मि-द्युति-चय-सदृशीम्[2]।
फुल्ल-पद्मोपविष्टां वीणा-नागेन्द्र-शङ्खाम् ॥२६॥

१ प्राक्पाठः ख घ ओं

युध-परशु-धरां[1] दोर्भिर् ईड्यैश्[2] चतुर्भिः।
मुक्ता-हारांशु[3]-नाना-मणि-युत-हृदयाम् ॥२७॥

१ क ग घ छ °धरा २ क ईज्यैश् ख ईध्यैश् घ ईढै ३ ख घ °हारंशु°

सीधु[1]-पात्रं वहन्तीं[2] वन्दे भेडा[3]-भवानीम्।
प्रहसित[4]-वदनां साधकेष्ट[5]-प्रदात्रीम् ॥२८॥

१ क ग घ ङ सिंधु° ख शिंधु° च छ शीधु° २ ख वहंतिं च वहंती ३ क ङ भीडा° घ भेडां
४ क ग प्रहिसित° घ प्रहसति° ५ क सादकोष्ट° ख शाधकेष्ट° ग काधकेष्ट°

अथ वक्ष्यामि देवेशि ज्वालामुख्या[1] अनुत्तमम् ।
ध्यानं मया विरचिते ग्रन्थे ज्वालाशिरोमणौ ॥२९॥

१ क ख च ज्वालामुख्याम्

[1]ज्वाला-परीतास्यं[2]-शिरो[3]रुहां तां सरोज-शङ्खा[4]सि-गदा-धरां[5] च ।
सिंहासने[6] स्थापित-पाद-युग्मां[7] ज्वालामुखीं सु-हृदये[8] स्मरामि ॥३०॥

१ प्राक्पाठः ख घ ओं २ क °परीतासि° च °परीतस्यं° ३ क ग च छ °सरो°
४ ख °संख्यासि° घ °संखाशि° च °शंखाप्ति° छ °शंखस्य° ५ ख ग °धरं
६ ग ङ सिंहासन- ७ क ङ °पद्मां छ °पाणियुग्मां ८ क सुहृदयं ग हृदये
घ सहृदये ङ सद्धृदये च छ मद्धृदये

अथाहं भद्रकाल्याश्[1] च ध्यानं वक्ष्यामि निः[2]स्मृतम्[3] ।
स्वयं मया विरचिते तन्त्रे[4] वै वामकेश्वरे[2] ॥३१॥

१ क च छ ते २-२ ग नास्ति ३ क निःसृनं ङ निःसृतं
४ ☞ अतः परम् आवसानं छ नास्ति

[1]मुण्डं विश्वस्यं[2] कर्तुः कर-कमल-तले धारयन्तीं[3] हसन्तीम्[4][1] ।
नाहं तृप्ता वदन्तीं[5] सकल-जन[6]-चयं[6] भक्षयन्तीं[7] सदैव ॥३२॥

१-१ ग नास्ति । प्राक्पाठः ख घ ओं २ ङ (पठान्तरम्) विश्वस्य द्विः ३ क च धारयंती
ख धारयंति ४ ख सहंतिं ङ च हसंती ५ ख वदांती च वदंती ६-६ ग ङ °जनमिदं
७ ङ च भक्षयंतो

श्यामां विष्णुं गिरीशम् अरि-कुल-मथनं दोर्भिर् ईड्यैर्[1] धृतासिम्[2] ।
ध्याये ऽहं भद्रकालीं नव-जल-विषदां[3] प्रेत-मध्यासन-स्थाम् ॥३३॥

१ ? क च ईज्यै ख ईथैर् ग ईज्यैर् घ ईद्वै ङ रावा २ ख धृतास्यं ग वृतास्यां घ धृताश्यं
ङ हयंतीं च धृतासि ३ ङ प्रहसिनवजलदनिभां च °दपिभां

तुरी-ध्यानम् अहं वक्ष्ये निःस्मृतम्[1] आगमामृते ।
अस्मिंश् चराचरे ख्याते ब्रह्मणैव[2] प्रकाशिते ॥३४॥

१ घ च निसृतम् २ क ङ ब्रह्मणा वै

नाना-रत्न-निबद्ध-चन्द्र-शकलां मौलौ जटाभिर् वृते ।
पाशाम्भोज-धरां हिमांशु-धवलां दोर्भ्यां द्वि-बाहुं शिवाम् ॥३५॥
सूर्येन्दु-अग्नि-विलोचनां सित[1]-मुखीं प्रेतासने संस्थिताम् ।
ब्रह्मा-विष्णु[2]-महेश्वरैश् च नमितां देवीं भजे ऽहं तुरीम् ॥३६॥[3]

१ ग ङ स्मित° २ ङ °पेंद्र° ३ अधिपाठः ङ इत्युद्धारकोशे षष्टः कल्पः६

अथादौ[1] छिन्नमस्ताया ध्यानं वक्ष्यामि निःस्मृतम्[2] ।
स्व-कृते[3] त्रिपुरायाश् च ग्रन्थे देवि शिरोमणौ ॥३७॥

१ क च अथाहं ख तथादो २ क ख ङ च निःसृतं ३ ख ग सुकृतं च स्वकृतं

ऐणाङ्कांशु[1]-परीत-भाल-फलकां बालार्क-कोटि-प्रभाम् ।
ज्वाला-बद्ध[2]-महार्व-रत्न-निचयां कन्दर्प-दर्पोज्ज्वलाम् ॥३८॥

१ प्राक्पाठः ख घ ओं २ घ °मध्य°

शूलास्य्-अङ्कुश-पाश-वेणु-मुसलाम्भोजान्[1] भयान् बिभ्रतीम् ।
भक्तेष्टां[2] छिन्नमस्तकां भगवतीं ध्याये हृद्-अब्जे सदा[2] ॥३९॥

१ क मुसु° ख °मुशुलान्भोजान् ग °भोज्या घ °मुशलान्भोजान् ङ °भोजा च °मुशलांभोजा
२-२ ङ भक्तैः पूजितपादपद्मयुगलां श्रीश्छित्रमस्तां भजे

दक्षिणाकालिकायाश् च ध्यानं वक्ष्यामि निःस्मृतम्[1] ।
ग्रन्थे कालीरहस्ये[2] ऽस्मिन् पर्वतेश्वर-नन्दिनि ॥४०॥

१ क ङ निःसृतम् २ क ग च काले°

ब्रह्मा[1]-विष्णु[2]-शिवास्थि-मुण्ड[3]-रसनां[4] ताम्बूल-रक्ताधराम् ।
वर्षा-मेघ-निभां त्रिशूल-मुसलौ[5] पद्मासि-पाशाङ्कुशान्[6] ॥४१॥

१ प्राक्पाठः ख घ ओं २ ङ °पेंद्र° ३ ख ग घ °मंड° ४ ख ग ङ °रशनां
५ क ख घ °मुसुलौ ग °मखला ङ °मुसुले च °मुशलौ ६ क °शां

शङ्खं[1] साहियुगं[2] धृतां[3] दश-भुजां[4] प्रेतासने[5] संस्थिताम्[5] ।
देवीं दक्षिणकालिकां भगवतीं रक्ताम्बरां तां स्मरे[6] ॥४२॥

१ क शंखां २ ! क स्याहियुगां ख घ शाहियुगं ३ घ धृतो ङ वरं ४ क °भुजा
ङ °भुजैः ५-५ ङ संबिभ्रतीं प्रेतगां ६ घ स्मरेत्

अथ वक्ष्यामि श्यामाया ध्यानं पर्वत-नन्दिनि ।
श्यामा-तन्त्रे मया ख्यातं सकलागम-सागरे ॥४३॥
त्रैलोक्य[1]-पूजित-पदाम्बुरुह-द्वयां ताम् ।
कृष्णाम्बुभृत्[2]-सदृश-रूप-धरां त्रि-नेत्राम् ॥४४॥

१ प्राक्पाठः ख घ ओं २ ख वूलांवूभृत्°

शूलासि-शङ्ख-महतीं स्वै-भुजैर्[1] वहन्तीम्[2] ।
श्यामां भजे[3] शव-शरीर-कृतासन-स्थाम् ॥४५॥

१ ख त्य° ग ख° घ स° ङ च २ घ वहंति ङ च °ती ३ क च स्मरे

अथाहं कालराज्यास् ते ध्यानं वक्ष्यामि निःस्मृतम्[1] ।
मया विरचिते देवि[2] तन्त्रे वै वामकेश्वरे ॥४६॥

१ क ग ङ निःसृतं　　२ ख घ ग्रंथे

[1]शूलाब्ज-पाशाङ्कुश-[2]पद्म-हस्तां[2] [3]चतुर्-भुजां धूम-निभां[4] त्रि-नेत्राम् ।
सिंहासन-स्थां धृत-पीत-वस्त्रां[3] ध्याये महेशीं हृदि कालरात्रीम् ॥४७॥

१ प्राक्पाठः ख घ ओं　　२-२ क च (व्यत्यासेन) °हस्तपद्मां　　३-३ घ नास्ति (दृष्टि-प्लुतिः)　　४ ख धूम्रनिभां ङ सूर्यनिभां च धूम्रनिमां

नानाभरण-संयुक्ते देवि वक्ष्यामि त्वं शृणु ।
श्रीवज्रयोगिनी-ध्यानं निःस्मृतं[1] कुलिकार्णवे[2] ॥४८॥

१ क घ ङ निःसृतं　　२ ङ कालिकार्णवे च कलकार्णवे

[1]इन्दु-अग्नि[2]-सूर्य-नयनां पाशाङ्कुश-धरां शिवाम्[3] ।
द्वि-भुजां सिंहम् अध्यस्थां भजे ऽहं वज्रयोगिनीम् ॥४९॥

१ प्राक्पाठः ख घ ओं　　२ ग इंद्राग्नि°　　३ घ शुभां

अथ वक्ष्यामि वाराह्या ध्यानं तन्त्रे[1]-विनिश्चितम् ।
यथाभीष्ट-प्रदं देवि कुलचूडामणौ प्रिये ॥५०॥

१ ग घ ङ च तत्र

चन्द्रार्ध-चूडां द्वि-भुजां भुजाभ्यां शूलाङ्कुशौ श्याम-मुखीं वहन्तीम् ।
सूर्याग्नि-चन्द्री-कृत-दृष्टि-पातां[1] ध्याये हृद्-अब्जे विमलां[2] वराहीम्[3] ॥५१॥

१-१ ङ °नेत्रपद्मां　　२ क ङ विमला　　३ क वराही ग वहंतीं

अथ वक्ष्यामि देवेशि शारदा-ध्यानम् उत्तमम् ।
शारदापटले ग्रन्थे रचिते ऽपि मया स्वयम् ॥५२॥
[1]षड्-भुजां त्रि-नयनां स्मिताननां शाण्डिल्यर्षि-स्तुते[2]-पाद-पङ्कजाम् ।
पर्वते[3] स्थितवतीं[4] धृत-शूलां शारदां[5] भगवतीं हृदि ध्याये[6] ॥५३॥

१ प्राक्पाठः ख घ ओं　　२ ख ग शांडिलिनस्तुत°　घ शांडिल्येनस्तुति°　च शांडिल्यर्षिनुत°
३ ग घ पर्वत-　ङ च पर्वं-　　४ क घ स्थितवती　　५ ख सरदा ग शारदा । च द्विरुक्तिः
६ घ ध्यायेत्

अथ वक्ष्यामि देवेशि त्वं[1] शृणु[1] ध्यानम् उत्तमम् ।
कामेश्वर्यास् त्रिपुरायाः सर्वस्वे तन्त्रकोत्तमे ॥५४॥

१-१ ङ (व्यत्यासेन) शृणु त्वं

[1]त्रि-लोचनां सूर्य-सहस्र-शोभां सिंहासन-स्थां द्वि-भुजां धृतासिम् ।
पीताम्बरां विष्णु-महेश-सेव्यां कामेश्वरीं तां हृदये स्मरामि ॥५५॥

१ प्राक्पाठः ख घ ओं

अथ वक्ष्यामि गौर्यास् ते ध्यानं भैरव-तन्त्रके ।
ग्रन्थे मया विरचिते पर्वतेश्वर-नन्दिनि ॥५६॥

[1]गौराङ्गीं [2]धृत-पङ्कजां त्रि-नयनां श्वेताम्बरां सिंह-गाम् ।
चन्द्रोद्भासित-शेखरां स्मित-मुखीं[3] दोर्भ्यां[4] वहन्तीं गदाम् ॥५७॥

१ प्राक्पाठः घ ओं २ घ च गौरांगी ३ क °मुखां ४ घ च वहंती

विष्वग्-इन्द्रा[1]म्बुज-योनि-शंभु-त्रिदशैः संपूजितांघ्रि-द्वयाम्[2] ।
गौरीं[3] मानस-पङ्कजां[4] भगवतीं[5] भक्तेष्ट-दां तां भजे[6] ॥५८॥

१ क विस्वंद्रा° ख वन्हिंद्रा° ग विष्वेंद्रा° घ विस्लिंद्रा° च किल्विद्रा° २ क °द्वयीं ख °द्वयं ३ क घ च गौरी ४ क ङ च °पंकजे ग °पंकजै ५ क घ भगवती ६ घ भजेत्

अथाहम् अन्नपूर्णाया ध्यानं वक्ष्यामि त्वं[1] शृणु ।
निःस्मृतं[2] भैरवे[3] तन्त्रे मया देवि प्रकाशिते ॥५९॥

१ क घ तं २ ख निःसृतं घ ङ निसृतं अन्यत्र निस्मृतं ३ क ग भैरवी-

[1]चन्द्रार्ध-मौलिं द्वि-भुजां त्रि-नेत्रां शूलाक्ष-माले द्वि-भुजैर् वहन्तीम् ।
एणासन-स्थां भुजगोपवीतां ताम् अन्नपूर्णां हृदये स्मरामि ॥६०॥

१ प्राक्पाठः ख घ ओं

कुलवागीश्वरी-ध्यानं वक्ष्यामि त्वं शृणु प्रिये ।
आगमामृतमञ्जर्यां दुर्लभायां ममापि च ॥६१॥
[1]त्रिशूलासि-[2]धरां दोर्भ्यां रक्तास्यां वह्नि-संनिभाम्[3] ।
त्र्य्-अक्षां सिंहासन-गतां कुलवागीश्वरीं भजे[4] ॥६२॥

१ प्राक्पाठः घ ओं २ ख घ त्रिशूलास्थ° ३ ख °सन्निभा च °प्रभां ४ घ भजेत्

अथ वक्ष्ये गणेशस्य ध्यानं गीर्वाणे[1]-पूजिते ।
आगमार्णवपीयूषे[2] दुर्लभे भुवने ऽम्बिके ॥६३॥

१ क ख गिर्वाण° ग घ गीर्चाण° २ क आगमार्णवपीपूषे ख आमार्णवं च पीपूषे

[1]द्वि-चतुर्दश-वर्ण-भू-चितं[2] मुसलाम्भोज[3]-धरम्[4] अह्य्-उपवीतम्[5] ।
द्वि-मृगाधिप-गामिनं[6] त्रि-नेत्रं शिव-पुत्रं[7] द्वि-रदाननं[8] भजे ऽहम् ॥६४॥

१ प्राक्पाठः ख घ ओं २ ? घ °वर्णविभूषितं ३ क गंमुसलांभोज° ख मुसुलांभोज° ग मुसुलाबोज° घ मुश° ङ गंमुसलांभोज° च गंमुशलांभोज° ४ क °धरांम् ङ °धरो ५ ? क अह्योपवीतं ख घ अह्युपीतं ङ रगोपवीतं च अहोपवीतं ६ च °मृगाधिपवाहनं ७ ख °पूत्रं च °सुतं ८ क °रतानंन ख वरदाननं

अथ ध्यानं कुमारस्य वक्ष्यामि शृणु पार्वति ।
निःस्मृतम्[1] आगमोद्द्योते[2] मया विरचिते शिवे[3] ॥६५॥

१ क ख ङ च निसृतम् ग घ निस्मृतम् २ क च आगमोद्योते ख अगमद्योत
ग घ आगमोद्योते(घ °त) ३ ङ च स्वयं

हिमाद्रि-श्वेतं[2] द्वि-भुजं भुजङ्गैः परीत-गात्रं शिखि-विष्टर-स्थम् ।
नागेन्द्र[3]-कन्या-प्रिय-पुत्रम् आद्यं हृदि स्मरे ऽभीष्ट-प्रदं कुमारम् ॥६६॥

१ प्राक्पाठः ख घ ओं २ ग घ हेमा° ङ हिमाद्रिगौरं ३ ख घ नगेंद्र°

हैहयस्य[1] ब्रवीम्य् एवं[2] ध्यानं तव कुतूहलात् ।
यथाभीष्ट[3]-प्रदं नृणाम् उड्डामर-विनिश्चितम् ॥६७॥

१ क हेहयस्य ख मस्य घ हैयग्रीवस्य २ क च अहं ३ क यथाभि° ख घ यथाभिष्ट°

सहस्र-भुज-मण्डली-जिततमीचरेशाधिपम् ? ।
हिमांशु-सदृशाननं धृत-सहस्र-तूणीरकम् ॥६८॥
सिताम्बर-धरं सदा तुरग-राज-मध्य-स्थितम् ।
स्मरामि भुवनाधिपं हृदि तु कार्तवीर्यार्जुनम् ॥६९॥
अथ वक्ष्यामि देवेशि ध्यानं तस्य विनिःस्मृतम्[1] ।
मृत्युंजयस्य देवस्य ग्रन्थे कुब्जाशिरोमणौ ॥७०॥

१ क च निःसृतं घ निश्चितं

चन्द्रोद्भासित-मूर्धजं सुर-पतिं पीयूष-पात्रं वहन् ।
हस्ताब्जेन सुधांशु-कोटि-विमलं हास्यस्यं[2] पङ्केरुहम्[3] ॥७१॥

१ प्राक्पाठः घ ओं २-२ ङ चंद्राम्रताम्लावितम् ३ क च हास्यास्य ग हासस्य

सूर्याग्नीन्दु-विलोचनं कर-तलैः[1] पाशाक्ष-सूत्राङ्कुशा- ।
-म्भोजान् बिभ्रतम् अक्षयं पशु-पतिं मृत्युंजयं तं स्मरे[2] ॥७२॥

१ ख करतले २ क स्मरेत्

सुग्रीवस्याथ वक्ष्ये ऽहं ध्यानं पर्वत-नन्दिनि ।
कुलचूडामणौ ग्रन्थे निर्मिते[1] मन्त्र-सागरे ॥७३॥

१ क च निस्मृतं घ निर्मितं

बालं षोडश-हायनं कपि-पतिं वह्नि[2]-प्रभा-भास्वरम् ।
दोर्भिर् वृक्ष-गदा-धनुः-शर-चयान् संबिभ्रतं सादरात्[2] ॥७४॥

१ प्राक्पाठः घ ओं २-२ ख नास्ति (दृष्टि-प्लुतिः)

वन्द्यं[2] देव-स्वरूपिणं[3] रघु-पतिं[4] चाराधयन्तम्[5] मुदा ।
ध्याये ऽहं भगवन्तम् अर्क-तनयं सुग्रीवदेवं[6] हृदि ॥७५॥

१ १ ङ सीतामार्गणसक्रवानखलैराराध्यमानं भजे काकुत्स्थं भजमानमर्कजनयं २,३ ग नास्ति
२,३,४ ख नास्ति (दृष्टि-प्लुतिः) ५ ग घ चाधारयंतं ६ घ सुग्रीवं

अथाहं ते हनुमतो ध्यानं वक्ष्यामि निःस्मृतम्[1] ।
कुलचूडामणौ ग्रन्थे पर्वतेश्वर-नन्दिनि ॥७६॥

१ क ङ च निःसृतं ख ग घ विस्मृतं

[1]रामेष्ट-मित्रं जगद्-एक[2]-वीरं प्लवङ्ग-राजेन्द्र-कृत-प्रणामम् ।
सुमेरु-शृङ्गाभम् अचिन्त्यम् आद्यं हृदि स्मरे ऽहं हनुमन्तम् ईड्यम्[3] ॥७७॥

१ प्राक्पाठः ख घ ओं २ ख गदेक° ग रजगदेक° ङ जगदेव° ३ ग ईचं घ ईळ्यं

अथ ते भैरवस्याहं ध्यानं वक्ष्यामि पार्वति ।
निःस्मृतं[1] भैरवे[2] तन्त्रे यथाभीष्ट[3]-फल-प्रदम् ॥७८॥

१ क च निःसृतं ख ग ङ निस्मृतं घ निसृतं २ क ग भैरवी- ३ ख यथाभिष्ट°

[1]कपाल-हस्तं भुजगोपवीतं कृष्ण-छविं दण्ड-धरं त्रि-नेत्रम् ।
अचिन्त्यम् आद्यं मधु-पान-सक्तं हृदि स्मरे[2] भैरवम् इष्ट-दं तम् ॥७९॥

१ प्राक्पाठः घ ओं २ क भजे घ स्मरेद

अथ वक्ष्यामि सूर्यस्य ध्यानं तन्त्रे[1]-विनिश्चितम् ।
त्रिपुरासर्वस्वे ग्रन्थे दक्षिणामूर्तिना कृते ॥८०॥

१ ख ग ङ च तत्र

[1]प्रत्यक्ष-देवं विषदं सहस्र[2]-मरीचिभिः शोभित-भूमि-देशम् ।
सप्ताश्व-गं सद्ध्वज[3]-हस्तम्[4] आद्यं देवं भजे ऽहं मिहिरं[5] हृद्-अब्जे ॥८१॥[6]

१ प्राक्पाठः घ ओं २ ख राहस्रं घ सहस्रैर् च सहस्रं ३ ? क ध्वज° ख सद्वुज° ग द्ध्वज° घ सद्ध° ४ क °सहस्रम् घ ङ °सहस्तम् ५ क मिहदं घ मिहिर ङ मिहरं
६ अधिपाठः ख सू

अथ वक्ष्यामि सौम्यस्य[1] ध्यानं भैरव-तन्त्रके ।
यथाभीष्ट[2]-प्रदं सत्यं[3] सुरासुर-नमस्कृते[4] ॥८२॥

१ ग ङ सोमस्य २ ख घ यथाभिष्ट° च यथाभीष्टफलं ३ च नास्ति
४ ग च नमस्कृतं

[1]सोमात्म-जं[2] हंस[3]-गतं[3] द्वि[4]-बाहुं शङ्खेन्दु-रूपं ह्यू[5] असि-पाश-हस्तम्[6] ।
दया-निधिं भूषण[7]-भूषिताङ्गं बुधं स्मरे[8] मानस-पङ्कजे ऽहम् ॥८३॥[9]

१ प्राक्पाठः घ ओं २ ग सोमातमजमिति ३-३ ग नास्ति ४ ख घ हस्तगतं च हंसगतिं ५ क च नास्ति ६ ङ °पाणिम् ७ ख भूषिते ८ ख स्मरेन्
९ अधिपाठः ख बु

[1]अथ वक्ष्यामि शुक्रस्य ध्यानं तन्त्रे[2]-विनिश्चितम् ।
[3]कुब्जिकासर्वस्वे ग्रन्थे[3] ब्रह्मणैव प्रकाशिते[4] ॥८४॥[1]

१-१ च ८७ श्लोकात् परम् २ ख ग घ ङ च तत्र ३-३ घ कुब्जिकापि च सर्वस्वे
४ क घ प्रकाशितं ख °तो

संतप्त[1]-काञ्चन-निभं द्वि[2]-भुजं दयालुं पीताम्बरं धृत-सरो[3]रुह-द्वंद्व-शूलम्[4] ।

क्रौंचासनं[5] च[6] सुर[6]-सेवित-पाद-पद्मं शुक्रं स्मरे द्वि[7]-जयनं हृदयाम्बुजे[8] ऽहम्[1] ॥८५॥

१-१ च ८४ श्लोकेन सह ८७ श्लोकात् परम् । प्राक्पाठः ख घ ओं   २-२ ग इत्यादि
३ क °शिरो° घ °सशे च °सरी°   ४ क °शुक्रौ ख °श्रूलं   ५ क चासन ङ क्रौञ्चासनं
६-६ क सुर° ख च शुर° ङ ह्रसुर° च असुर°   ७ क चं त्रि°   ८ क हृदयंबुजे
ख हृदियंकुजे घ हृदियंबुजे ङ हृदियंकजे

अथ वक्ष्यामि जीवस्य श्रृणु पार्वति तत्त्वतः ।
ध्यानं भैरव-तन्त्रोक्तं सकलार्थ-प्रदं नृणाम् ॥८६॥

तेजो-मयं शक्ति[1]-त्रिशूल-हस्तं सुरेन्द्र-ज्येष्ठ-स्तुत-पाद-पद्मम्[2] ।
मेधा-निधिं[3] मत्स्य-गतं ? द्वि-बाहुं गुरुं स्मरे[4] मानस-पङ्कजे ऽहम्[1] ॥८७॥[5]

१-१ ग शक्तिमित्यादि   २ ख घ °पंकजां(घ °जं)   ३ ख °नीधिं च °निधिर्
अन्यत्र °निधि-   ४ क ङ च स्मरेत्सदा   ५ अधिपाठः ख जी

अथ वक्ष्यामि चन्द्रस्य ध्यानं देवि श्रृणु प्रिये ।
निःस्मृतम्[1] आगमोद्द्योते[2] नाना-ध्यान-सरित्पतौ ॥८८॥

१ ख निस्मृतम् ग निस्मृताम् घ निसृताम्   २ क च आगमोद्योते ख ग घ आगमद्योते
ङ चागमोद्योते

शङ्ख[1]-प्रभम् एण-प्रियं[2] शशाङ्कम् ईशान-मौलि-स्थितम् ईड्य[4]-रूपम् ।
तमी-पतिम्[5] अम्बुज[6]-युग्म-हस्तं ध्याये हृद्-अब्जे शशिनं ग्रहेशम्[7][1] ॥८९॥[8]

१ प्राक्पाठः घ ओं   २ ख मेणप्रिये ग पेणप्रियं   ३-३ ग इत्यादि   ४ ख ईद्य° घ ईज्य°
५ घ तमापतिं   ६ ख घ नीरज°   ७ क ग्रहेंद्र ख गृहशं घ ग्रहेद्र
८ अधिपाठः ख चं

अथ वक्ष्यामि भौमस्य[1] ध्यानं तन्त्र[2]-विनिश्चितम् ।
आगमामृतमञ्जर्यां श्रृणुष्वैक[3]-मना[4]ः प्रिये[3] ॥९०॥

१ ङ देवेशि   २ क ख ग ङ च तत्र   ३-३ ङ भौमस्यैकमनाः श्रृणु
४ ख घ °मना ग °मनः

प्रतप्त[1]-गाङ्गेय-निभं ग्रहेशं[2] सिंहासन-स्थं[3] कमलासि-हस्तम् ।
सुरासुरैः पूजित-पाद-पद्मं[4] भौमं दयालुं[5] हृदये स्मरामि ॥९१॥[6]

१ प्राक्पाठः घ ओं   २ ख ग गृहेशं   ३ ख °स्थां   ४ क ङ °युग्मं   ५ क घ दयालं
६ अधिपाठः ख भौ

अथ वक्ष्ये शनेर्[1] ध्यानं यथाभीष्ट-फल-प्रदम् ।
निःसृतं[3] च महेशानि शुभ[4]-दम् आगमामृते[4] ॥९२॥

१ क च शनैर् घ शने २ ख यथाभिष्ट° ३ क ख ङ च निःसृतं ग निस्मृतं घ निसृतं
४-४ घ शुभदमालयामृते ङ शुभदं चागमामृते च शुभदमृतसागरे

नीलाञ्जनाभं[1] मिहिरेष्ट-पुत्रं ग्रहेश्वरं पाश-भुजङ्ग-पाणिम्[2] ।
सुरासुराणां भय-दं द्वि-बाहुं स्मरे[3] शनिं[3] मानसे[4]-पङ्कजे ऽहम्[1] ॥९३॥[5]

१-१ ग नीलांजनाभमित्यादि । प्राक्पाठः ख घ ओं २ घ °मानं ३-३ ङ (व्यत्यासेन)
शनिं स्मरे ४ ख नामसु ५ अधिपाठः ख श

अथाहं[1] सैंहिकेयस्य[2] ध्यानं वक्ष्यामि त्वं[3] शृणु ।
निःस्मृतं[4] फल-दं नृणां तन्त्रे वै वामकेश्वरे ॥९४॥

१ घ अथ २ क च सैहिकेयस्य ख सौहिकीयस्य घ सैहकेयस्य ३ क तं
४ क ङ च निःसृतं ख घ निसृतं ग निस्मृतं

शीतांशु[1]-मित्रान्तकम् ईड्य[2]-रूपं घोरं[3] च वैडूर्य-निभं द्वि-बाहुम्[4] ।
त्रैलोक्य-रक्षा[5]-परम्[6] इष्ट-दं च राहुं[7] ग्रहेन्द्रं हृदये भजे[8] ऽहम्[8] ॥९५॥[9]

१ प्राक्पाठः घ ओं २ घ ईज्यं ३ क ग चोरं च घोरं ४ घ °वाहूं ५ क घ °रक्ष्या°
६ ङ °प्रदम् ७ घ राहूं ८-८ ग ङ स्मरामि ९ अधिपाठः ख रा

अथ वक्ष्यामि केतोश् च ध्यानम् आगम-निश्चितम्[1] ।
निःस्मृतं[2] आगमोद्द्योते[3] ग्रन्थे वै मन्त्र[4]-सागरे ॥९६॥

१ ख °विनिश्चितं २ क ख ङ च निःसृतं ग निस्मृतम् घ निसृतम्
३ ख ग घ आगमद्योते ४ ङ तंत्र°

लाङ्गूल-युक्तं भय-दं जनानां कृष्णाम्बुभृत्-संनिभम् एक-वीरम् ।
कृष्णाम्बरं शक्ति-त्रिशूल-हस्तं केतुं भजे मानस-पङ्कजे ऽहम् ॥९७॥[2]

१ प्राक्पाठः ख घ ओं २ अधिपाठः ख के

अथ वक्ष्यामि देवेशि भवानी-ध्यानम् उत्तमम् ।
कुलचूडामणौ ग्रन्थे निःस्मृतं[1] भुवनेश्वरि ॥९८॥

१ क ङ च निःसृतं ख घ निसृतं ग निस्मृतं

अरि-शङ्ख-कृपाण[2]-खेट-बाणान्[3] स्व-धनुः[4] शूलक-तर्जनीं दधानाम्[5] ।
भय-दां[6] महिपोत्तमाङ्ग-संस्थां नव-दूर्वा-सदृशीं[7] भजे भवानीम् ॥९९॥

१ प्राक्पाठः ख घ ओं २ ख अरीशंखंण° ३ घ °वाणां ङ च °बाणान् ४ क ग ङ
सुधनुः ख स्वधनु च स्वधनः ५ ग च दधानं ६ क भयहां ग भवतां ७ क °दुर्वासदृशीं
ख °दूवासदशीं ग °दूवांसदृशीं घ °दुर्गांशदृशीं

अथाहं बगलामुख्या ध्यानं वक्ष्यामि निःस्मृतम्[2] ।

आगमामृतमञ्जर्यां सुरासुर-नमस्कृते ॥१००॥

१ ग भगला° २ ग-वर्जम् अन्यत्र निःसृतं ग निस्मृतं

[1]नाना-रत्न-निबद्ध-रम्य[2]-मुकुटां[3] पीताम्बरां भाग्य-दाम्[4] ।

धर्मांश्व[5] -अग्नि-शशाङ्क-रश्मि[6]-नयनां सिंहासन-स्थां शिवाम् ॥१०१॥

१ प्राक्पाठः ख घ ओं २ ख ग °रत्य° ३ क नास्ति । च °रसनां ४ ख °दं

५ क घ धर्मांश्व्° ख धर्मांश्व्° ६ ख °रश्मि°

सद्-गाङ्गेय[1]-निभां महार्घ[2]-मणिभिर् उद्भासिताङ्गीं[3] सदा ।

देवीं[4] श्री-बगलामुखीं हृदि भजे भक्तेष्ट-दां[6] मुक्तिँ-दाम् ॥१०२॥

१ क सद्गांगेयनिभां ख सचंजीयनीभां ग सश्वंडीयनिभां घ यचंडीयनिभां ङ पाठान्तरम् सश्वंडीशरतां च सद्गांगेय- २ ख घ महर्घ° ग महार्घ° ३ ख °सितांगिं घ °सितांगी° ४ क देवी च देवे ५ ग श्रीभगला° ६ क भक्तेष्टिदा ख भक्तप्रदां घ भक्तैष्टिदां

७ क ङ च भुक्ति°

अथ वक्ष्ये शृणोषि त्वम् इन्द्राक्षी[1]-ध्यानम् उत्तमम् ।

निःस्मृतं[2] जगद्-ईशानि[3] ग्रन्थे वै रुद्रयामले ॥१०३॥

१ ख इंद्रछी° ग ङ इंद्राणी° च इंद्रक्ष्या २ क घ ङ निसृतं ख च निःसृतं ग निस्मृतं

३ क ख घ च °एशानि

[1]मालास्य्-अङ्कुश[2]-पद्म-युग्मक-धरां [3]साहस्र-नेत्रां शिवाम्[3] ।

मत्तैरावण-पृष्ठ-गां[4] शशि-मुखीं त्रैलोक्य-रक्षा-पराम् ॥१०४॥

१ प्राक्पाठः ख घ ओं २ क ख मालास्यंकुस° ग मालासिंकुश° च मालास्वंकुश°

३-३ ङ चक्षुःसहस्रांकितां ४ ग मंत्रैरावणष्टगां घ मत्तेरावतपृष्टगां

दोर्भिर् गान-रतां स्फुटाम्बुज-निभां[1] ब्रह्मादि-देवैः स्तुताम् ।

इन्द्राक्षीं[2] जन-मातरं हृदि[3] भजे कारुण्य-रूपां पराम्[4] ॥ १०५ ॥

१ क सरोरुहमुखीं च फुल्लांबुजनिभां २ ख इंद्राक्ष्यं च इंद्राक्षी

३ क च हरि ४ घ भजे

अथ वक्ष्ये महेशानि[1] खेचरी-ध्यानम् उत्तमम् ।

यां[2] ध्यात्वा खेचरीं[3] योगी[4] जीवन्-मुक्तो भवेत् कलौ[5] ।

[6]ग्रन्थे भैरव-तन्त्राख्ये[7] निःस्मृतं[8] त्रिदशार्चिते[6] ॥१०६॥

१ क च महादेवि २ क ग यं ३ क ख ग खेचरी ४ क देवि ५ ख कालौ

६-६ घ नास्ति ७ ख °तंत्राख्या ८ क ख घ च निःसृतं(ख °ते) ग ङ निस्मृतं (ग °ते)

विनिद्र[1]-कमलोत्पलैर् मुनिभिर् अर्चिताङ्घ्रि-द्वयाम् ।

सितासित-करानना[2] सित-करोज्ज्वल[3]-शेखराम्[4] ॥१०७॥

१ प्राक्पाठः ख घ ओं २ ङ °करांबुजां ३ क शितकरांज्वल° ख सितकरोज्वल° अन्यत्र सितकरोज्वल° ४ क घ ङ च °छेखरां ख °छखरं

रवीन्दु[1]-शिखि[2]-लोचनाम् अभय-पुस्तकौ[3] बिभ्रतीम् ।
स्मरामि हृदि खेचरीं भुवन-मातरं सिद्धि-दाम् ॥ १०८॥

१ क रवींद्र° २ ग च °शशि° ३ ग °पुस्तंको ङ °पुस्तको

एतासां देव-देवेशि मन्त्र[1]-ध्यान-चयं[2] स्मृतम्[3] ।
यस्य कस्य[4] न दातव्यं ग्रन्थम्[5] उद्धारकोशकम् ॥१०९॥

१ घ मंत्रा° च तंत्र° २ ङ °चयः ३ ङ स्मृतः ४-४ च यस्मै कस्मै ५ घ मंत्रम्

ऋषय ऊचुः

धन्यः स यस्य पुत्रस् त्वं सकलागम-पार-गः ।
अथ त्वं स्व-गृहं गन्तुम् आज्ञापयितुम् अर्हसि ॥११०॥

श्रीदक्षिणामूर्तिर्[1] उवाच

गच्छध्वं मुनयः सर्वे क्षमध्वं कृपया मम ।
इत्य् उक्ता मुनयो जग्मुः स्व-गृहं मन्त्र-लालसाः ॥१११॥

१ ग घ च नास्ति

ईश्वर उवाच

दक्षिणामूर्तिना तेन दृष्ट्वा तन्त्रान् मनो-रमान् ।
कृतम् उद्धारकोशाख्यं ग्रन्थं गोप्यतमं कुरु ॥११२॥

देव्य्[1] उवाच

क्रीतास्मि भवतानेन ग्रन्थेनाहं सुरेश्वर ।
इत्य् उक्त्वा सु-महा-कुञ्जं[2] कैलासाद्रेश् च जग्मतुः ।
उभौ ताव् अम्बिका[3] देवी देवश् च चन्द्र-शेखरः ॥११३॥

१ क श्रीदेव्य् २ क सहमाकुंजं ख स महाकुज्वं ग ममहाकुंजं घ सासनुकुंजं च हसाकुजं
३-३ क ताशुभामंबिका ख ओंभौताविंबका

इति श्रीदक्षिणामूर्ति[1]-विरचित उद्धारकोशे[2]
सकलागम-सारे[3] षोडश-देवी-सप्त-देवी-सप्त-कुमार-नव-ग्रह
-चतस्र-देवी-कोश-ध्यान-निर्णयो[4] नाम
सप्तमः कल्पः ॥[5]

१ ख श्रीदक्षिणामूर्तिमुनि° २ ङ उद्धारकोशाख्ये ३ क च °सागरे घ °शारे ४ क देविसप्त-कुमारनवग्रहचतश्रिदेवीध्यानविर्नयो ख खोडसदीप्रंनाभंत्रध्यानश्रीविशालवर्णनं

ग घ ङ षोडशदेवीसप्तकुमारनवग्रहसप्तदेवीकोशध्याननिर्णयो

च सकलध्यानं निर्णयो

५ अधिपाठः क ३ ॥ ॥

३ (६४ वारान्)

ख संवत् १८५३ मीति वैशाखशुक्ला १४ भृगुवाशरे लिषत्तंतिवाडिश्शितावरायस्य शुभमस्तु ॥

ग समाप्तो यमुद्धारकोशः ॥ ॥ ॥ ॥ ॥ ॥ ओं नमो भगवते ह्रीं एकदंष्ट्राय

हस्तिमुखाय लंबोदराय उच्छिष्टमहात्मने ओं क्रौं गं घे घे स्वाहा १

घ समाप्तम् शुभ श्री सं १८९९ आषाढवदी मिथुनार्कभुक्तदिनाः १२

ङ समाप्तो यमुद्धारकोशः शुभाय भवतु लेखकपाठकश्रोतृणाम्

च संवत् १७३५ श्रावण शुद्रि १ लिषितं बुलाकी ब्राह्मणजो इसीपठनार्थं शुभमस्तु ॥ श्लो ६१६ ॥

प्रथमं परिशिष्टम्

१

घ प्रथमे कल्पे ५६ श्लोकात् परं ज्वालामुखी-मन्त्रावसानं पाठान्तरम्

आगमलहर्यां तारं परपिकमलाकामं विश्वं ततो वरेत्
भगवती माहेश्वर्यै चान्नपूर्णे पि ठद्वय अभेदः
कामं परापि कमला तारं विश्वं ततो वदेत्
तंत्रसारे प्सारिकपै
तारं कुर्चं श्रियं मायां शून्य सिंधुरमेव च
नाम श्मरी मनोरंते मंत्रो ऽयं भुवि दर्लभें इत्युद्धार
ओं नमः शारदायै
तारं रमाशक्तिमायारश्मरी
नाम संवदेत् भगवत्यै शारदायै मनोरंते पराचनम् मंत्रोद्धार
प्रणवं माया च कमला शक्तिवाग्भवनन्मथौ
इन्द्राक्षीवज्रहस्ते च हरमंतेग्निवल्लभा
ओं नमो वगलामुख्यै
मृत्स्नां तारं च देवेशि बगलामुखी सर्वदा
दुष्टानां वा च मुखकं पदं स्तंभपयुग्मकं
युग्मं च कीलयं जिह्वा मनुठंद्वयमुत्तमं
ओं नमो महतर्यायै
तारकाज्योति प्रणवं मध्ये ताराभिधं न्यसेत्
अंते श्मरी महादेवि मंत्रो यं शत्रुसूदनः
त्रुं त्रां त्रों महातुर्यायै नमः ॥

२

घ द्वितीये कल्पे कालरात्री-मन्त्रात् परम् आ विंश-श्लोकं पाठान्तरम्

भैवागमतंत्रे

ओं नमो कुलवागीश्वयैं

तारं लक्ष्मी कामद्विंभकुर्चकाक्षाभिधं ततः

चंद्रः पद्मास्पृहापद्मो वेश्यायद्यो वर्नं मनुः

ओं नमो पद्मावत्यै

तारं रमापराकामपद्मा च तीविचीति च

मम वरं देहियुग्मं नीरमयं हरं मनुः

कुब्जिकातंत्रे

ओं नमः पराशक्त्यै तारं कामपराशक्तेः

रमावस्त्रं ततो भिधम् वाग्भवं च द्वयं देवि मंत्रराजोयमीरितः

ज्ञानार्णवे

ओं नमो छिन्नमस्तयै

लज्जां लक्ष्मीं तथा मायां द्वादशकामथामपि

बैरोचनीवज्रये द्वे फट् स्वाहा मायया युते

आगमलतिकायां

नमो महालक्ष्म्यै

तारं रमां परं कामं शक्तिवीजं च

वाग्भेवं महालक्ष्मीप्रसीदेति युग्मं मायं कजत्रयं

तन्त्रोच्चये भैरवार्णवे

ओं नमो भवान्यै

तारं रमा रमा माया तारं

माया रमा रमा फडंतः हूं

समाख्यातं मंत्रः सर्वार्थसाधकः

ज्ञानसागरे

द्वितीयं परिशिष्टम्

पुरुष-नामानि

अक्षोभ्य	१. १६, २. २, ३, २२
अक्षोभ्यक	३. २
उद्दालक	३. ४
गालव	३. ४
दक्षिणामूर्ति	१. ६, १६, १८, ६४, २. ३, ३. २, ५, ६, ११, १२, १४, ५१^{२}, ७५, ४. १५, '५. ३, ४, १८, ४२, ६. २, १३, ७. ८०, १११, ११२
मतङ्ग	२. २४
मातङ्ग	३. ४
लोहित	३. ४
शङ्ख	३. ४
शाण्डिल्य	३. ४, ७. ५३

तृतीयं परिशिष्टम्

नदी-पर्वत-नगर-नामानि

रेवा (नदी)	१. ४, ७
श्रीगर्भा (पुरी)	१. ४
स्फाटिकोर्वीभृत्	१. १

चतुर्थं परिशिष्टम्

मन्त्र-नामानि

अनलप्रिया	२. ४३
अन्नपूर्णा	३. ४१-४२
अपर्णा	पृष्ठं ३२
अम्बिका	पृष्ठं ३३
आदित्य	४. ६-७
इन्द्राक्षी	६. १०-११
उग्रतारा	पृष्ठं ३०
एकजटा	पृष्ठं ३०
कामेश्वरी	३. ३३-३५
कार्तवीर्यार्जुन	३. ५९-६०
कालरात्री	२. १४-१५
कुब्जिका	पृष्ठं ३२
कुमार	३. ५७
कुलवागीश्वरी	३. ४३-४५
केतु	४. ३०
खेचरी	६. १४-१६
गणेश	३. ५५-५६
गौरी	३. ३९
चक्रिणी	पृष्ठं ३१
चण्डिका	२. ३२
चन्द्र	४. १९
चामुण्डा	२. ३३
छिन्नमस्तका	२. ९, पृष्ठं ३४
ज्वालामुखी	१. ६२

तारा	१. ४०, पृष्ठं ३०
तारिणी	पृष्ठं ३०
तुरी	२. ७
त्रिपुरा	१. २०-२३, २. ३२
दक्षिणाकालिका	२. ४६
दक्षिणाकाली	२. ११-१२
दुर्गा	२. ३४
नारसिंही	२. ३३
नीलसरस्वती	पृष्ठं ३०
बगलामुखी	६. ६-८
बुध	४. ९
बृहस्पति	४. १२-१८
भगरूपिणी	पृष्ठं ३३
भद्रकाली	२. ५, ४६
भवानी	६. ५
भीमरूपा	पृष्ठं ३१
भीमा	पृष्ठं ३१
भुवनेश्वरी	१. ४५, पृष्ठं ३१
भेडा	१. ६०-६१
भैरव	३. ६६-६७
भैरवी	२. ३२, पृष्ठं ३०
भौम	४. २२
[महात्रिपुरसुन्दरी]	२. ३५
महामृत्युंजय	३. ७२
मातङ्गी	१. ४७-४८, पृष्ठं ३१
[मृडानी]	२. ३४
राज्ञी	१. ५७-५८
राहु	४. २६-२७
रुक्मिणी	२. ३९
लक्ष्मी	१. ३६
वज्रयोगिनी	३. १७
वज्रवैरोचनी	पृष्ठं ३४
वज्रवैरोचनीया	२. १०
वाग्देवता	२. ४०
वाणीभगवती	२. ४१
वाराही	३. २७-२९
वारुणी	२. ३४
शनैश्चर	४. २४-२५
शाम्बरी	पृष्ठं ३२
शारदा	३. ३२
शारिका	१. ५३
शुक्र	४. ११
श्यामा	२. १३
श्री	२. ३८
सरस्वती	१. ३८, २. ४२
सुग्रीव	३. ७३
सुमुखी	पृष्ठं ३१
हनुमत्	३. ६२-६५
हिङ्गुला	२. ३२
हैमवतीश्वरी	२.३४, पृष्ठं ३२
ह्रौन्द्री ?	२. ३३

पञ्चमं परिशिष्टम्

बीज-नामानि

अग्नि	१. ५९
अब्धि	३. ६९
अभ्र	३. ६८
अम्बर	४. ८
आकाश	१. ५५
इच्छा	३. ४६
ऊर्मि	३. ३७
ओंकार	१. ३०
कल्प	३. ७०
कल्याण	१. ५६

काली	१. ४९	मदन	१. २७
कूर्च	१. ४३	मन्त्र	१. ४६
गर्जित	४. २८	मृत्	६. ९
चन्द्र	३. ३६	लक्ष्मी	१. २४-२५
चारुक	१. ५१	वागुरा	१. ५०
छवि	३. ५८	वाग्भव	१. २८
°ज्योतिस्°	२. ८	वाह्लीक	३. ३०
तमः	३.३१	वृष्टि	४. ३१
तारका-ज्योतिस्-		वेधः	४. २३
तारा	२. ८	शक्ति	१. २९
°तारा	२. ८	शतघ्नी	३. ७१
नमः	१. ३९	शिव	३. ४०
नर्तकी	३. ४७	शुक्र	३. ६१
नाट्य	४. २०	षडानन	४. १०
नीर	१. ३७	सिन्धुर	१. ५४
पद्म	१. ५२	स्तन	३. ३८
प्रस्थ	६. १२	स्त्री	१. ४२
फट्	१. ४४	ह्रां	१. ४१
भद्रिका	२. ६	ह्रीं	१. २६

षष्ठं परिशिष्टम्

ध्यान-नामानि

अन्नपूर्णा	७. ५९-६०	जीव	७. ८६-८७
इन्द्राक्षी	७. १०३-१०५	ज्वालामुखी	७. २९-३०
कामेश्वरी	७. ५४-५५	तारा	७. १०-१२
कालरात्री	७. ४६-४७	तुरी	७. ३४-३६
कुमार	७. ६५-६६	त्रिपुरा	७. १-३
कुलवागीश्वरी	७. ६१-६२	दक्षिणाकालिका	७. ४०-४२
केतु	७. ९६-९७	बगलामुखी	७. १००-१०२
खेचरी	७. १०६-१०८	भद्रकाली	७. ३१-३३
गणेश	७. ६३ ६४	भवानी	७. ९८-९९
गौरी	७. ५६-५८	भुवनेश्वरी	७. १३-१५
चन्द्र	७. ८८-८९	भेडा	७. २५-२८
छिन्नमस्ता	७. ३७-३९	भैरव	७. ७८-७९

भौम	७. ९०-९१	शुक्र	७. ८४-८५
मातङ्गी	७. १६-१८	श्यामा	७. ४३-४५
मृत्युंजय	७. ७०-७२	श्री	७. ४-६
राज्ञी	७. २२-२४	सुग्रीव	७. ७३-७५
वज्रयोगिनी	७. ४८-४९	सूर्य	७. ८०-८१
वाग्देवी	७. ७-९	सैंहिकेय	७. ९४-९५
वाराही	७. ५०-५१	सौम्य	७. ८२-८३
शनि	७. ९२-९३	हनुमत्	७. ७६-७७
शारदा	७. ५२-५३	हैहय	७. ६७-६९
शारिका	७. १९-२१		

सप्तमं परिशिष्टम्

तन्त्र-नामानि

वृतिस्थेष्व् (   ) अङ्केषु तन्त्रनामानि पूर्वस्माद् उद्धृतानि

आगमलहरी	१. ३२, २. १०, ३. ७१, ७२, ४.२४, (२६), ६. ६
आगमशिरोमणि	३. ७३, ४. ११
आगमसिन्धु	१. ४१
आगमामृत	७. ३४,९२
आगमामृतमञ्जरी	५. २५, ५०, ७. १९, ६१,९०,१००
आगमार्णवपीयूष	७. ६३
आगमालंकार	१. २६,३९, ३. ३८, ७०
आगमालंकारण	५. ३१
आगमोद्द्योत	७. २५,६५,८८,९६
उड्डामर	१. २२,३७, २. १८, ३. ५९, ७. ६७
